श्रीकृष्णाय नमः ।

श्रीयमुनाष्टकम् ।

श्रीमत्प्रभुचरणविनिर्मितया विवृत्या श्रीहरिरायप्रणीतेन तट्टिप्पणेन च समनुगतम् ।

अवधीयताम्.

प्रस्तावनापाठः किलाऽऽवश्यकः परीक्षकाणाम् । किन्तु प्रकाशयितुमभिवाञ्छितानां ग्रन्थानां सङ्ग्रहसंशोधनादिभिरसन्निहितावसराः परवशा भवामः कार्य्यान्तरमनुष्ठातुम् । उपलब्धाभिर्निखिलाभिर्व्याख्याभिः प्रकाशितेषु पुनः षोडशस्वपि ग्रन्थेष्ववश्यमेव निर्मास्यामो विज्ञेयांशभूयिष्ठां यथाबुद्धि सरसरमणीयां प्रस्तावनाम् ।

अहो न्वयमवसरः । इदं सौभाग्यम् । एताः सिद्धयः । क वयम् । क कलिः । क चाऽयमाशिषामप्यविषयः प्रकर्षः परमः । यत्सम्प्रति कथमपि पूर्वमनुपलब्धेन भूयसा व्याख्याविभवेन समुद्भासितसारार्थसम्पत्सञ्चयान् षोडश ग्रन्थान् प्रकाशयितुं बलवदुत्सहामहे यच्च चिररात्राय तदर्थमुत्कण्ठितानां विद्वद्भगवदीयानां सौलभ्यमेतानापादयामहे । तदयमनुग्रह एवाऽतिलङ्घितमर्य्यादः स्वानुभावप्रकटनहृदयस्य भगवतः । प्रभवन्ति वा सेवेयं पादारविन्दपांसवः श्रीमदाचार्य्यचरणानाम् । अवसरेऽस्मिन् पारितोषिकं किमपि साञ्जलिबन्धमभ्यर्थया[illegible] विदुषो भगवदीयान् । तच्च तत्सङ्ग्रहेषु विभासमानानां व्याख्यानां नामानि सन्[illegible] तत्पुस्तकानि च । निर्व्यूढे तु संशोधने यथावत्पुनस्तानि प्रत्यर्प्येरन् । यद्यपि भू[illegible] व्याख्या अस्माभिस्तथापि नैताः कार्त्स्न्येन सङ्ग्रहमस्मदीयमुद्भासयन्ति विद्यमान[illegible] न्तरासान्निध्येन नाऽधिगच्छन्ति यथायथं संशोधनमिति । तदत्र विद्वद्भगवदीया[illegible]

श्रीश्रीहरिरायचरणप्रणीतेन टिप्पणेन सविवृतिकं श्रीयमुनाष्टकं प्रकाश[illegible] पञ्च विवृतिपुस्तकानि पञ्चैव च टिप्पणपुस्तकानि सङ्गृह्य बलवता प्रया[illegible] निरवीवृताम संशोधनम् । तत्र विवृतिपुस्तकानि पञ्चाऽपि विद्वत्प्रवरैर्[illegible] महामहोदयैरस्मत्पितृव्यचरणैर्व्यतीर्य्यन्त । अथ टिप्पणपुस्तकेष्वेकं [illegible] महोदयानां वैजयपुरपुरुहूतस्य श्रीमतः सवाईजयसिंहसम्राण्महाराजस्य[illegible] [illegible]णुभाष्यानुसारिणी मरीचिका नाम ब्रह्मसूत्रवृत्तिर्निबबन्धे ये च समस्[illegible] भिरूपपरिषत्प्रशस्यपाण्डित्यप्रकर्षपरिनिष्ठानां दीक्षितश्रीमल्लालूभट्टमहानु[illegible] श्रीमद्रघुनाथभट्टमहाभागानाञ्च सूनवः । इदञ्च तत्कुल एव श्रीश्यामसुन्[illegible] ग्राहितयाऽस्मदनुजया श्रीमत्या यमुनया वितीर्णं जीर्णजीर्णं कसञ्ज्ञम् । [illegible] तृव्यपादानां यत्खघङेति तिस्रः सञ्ज्ञाः समारोहति । पञ्चमञ्च श्रीमद्बाल[illegible] द्वैतसंस्कृतपुस्तकालयस्थं श्रीमद्गोकुलनाथगोस्वामिचरणमहामहोदयैर्दत्तं [illegible] सर्वेभ्यः साह्लादाः साधुवादाः ।

श्रीकृष्णाय नमः ।

षोडश ग्रन्थाः ।

श्रीयमुनाष्टकम् ।

श्रीमत्प्रभुचरणविनिर्मितया विवृत्या
श्रीहरिरायप्रणीतेन तट्टिप्पणेन च समनुगतम् ।

विद्वन्महाराजश्रीश्रीमद्गोकुलनाथगोस्वामिचरणमहामहोदयानां
कृपाकटाक्षितेन

भट्टश्रीबलभद्रशर्म्म—

कविकाव्यरत्नाकरकविचूडामणिशुद्धाद्वैतभूषणकविरत्नेन
संशोधितम् ।

मोहमय्यां

निर्णयसागरे सम्मुद्र्य

शुद्धाद्वैतसिद्धान्तकार्यालयात्
प्रकाशितम् ।

संवत् १९७२, सन १९१६.

निर्मञ्छनं ≡) तिस्रः कलाः ।

Printed by Ramchandra Yesu Shedge, at the 'Nirn aya-sagar Press, 23, Kolbhat Lane, Bombay.

Published by Pandit Bhatta Shri Balabhadra Sharma, Third Bhoiwada, Badamandir, Bhuleshwar, Bombay.

श्रीकृष्णाय नमः ।

श्रीमद्भगवद्वदनावतारश्रीमद्वल्लभाचार्य्यचरणप्रणीताः

षोडश ग्रन्थाः ।

यथोपलब्धनिखिलव्याख्याभिरुपेताः ।

तत्र प्रथमम्—

श्रीयमुनाष्टकम् ।

श्रीमत्प्रभुचरणविनिर्मितया विवृत्या
श्रीहरिरायप्रणीतेन तट्टिप्पणेन च समनुगतम् ।

नमामि यमुनामहं सकलसिद्धिहेतुं मुदा

श्रीमत्प्रभुचरणविनिर्मिता विवृतिः ।

विश्वोद्धारार्थमेवाऽऽविर्भूतवृन्दावनप्रियाः ।
कृपयन्तु सदा तातचरणा मयि विठ्ठले ॥ १ ॥

विविधलीलोपयोगिनीं कालिन्दीं स्तोतुकामाः श्रीगोकुलेशे यथा जीवैर्नमनातिरिक्तं न कर्त्तुं शक्यं तथा कालिन्द्यामपीत्याशयेनाऽऽदौ नमनमेवाऽऽहुः—नमामीति । भगवताऽष्टविधैश्वर्यं कालिन्द्यै दत्तमिति ज्ञाप-

---

श्रीहरिरायप्रणीतं टिप्पणम् ।

श्रीकृष्णाय नमः । श्रीगोपीजनवल्लभाय नमः । अथ श्रीमत्प्रभुचरणाः श्रीयमुनाष्टकविवृतिं विरचयन्तः प्रथममाचार्यवर्यस्वरूपमेतत्सजातीयधर्मवत्त्वेन निरूपयन्तः स्वस्मिन्विवृतिकृतिशक्तिसिद्धये तत्कृपां प्रार्थयन्ति—विश्वोद्धारार्थमिति । प्राकट्यप्रयोजनमेतत् । अत्र विश्वपदं सर्ववाचकम् ।

तदपि सङ्कुचितवृत्ति । "सर्वे ब्राह्मणा भोजयितव्या" इतिवत् । तथाच पुष्टिमार्गाङ्गीकृतानामेव जीवानामत्रोद्धार इति ज्ञेयम् । अयं च पुष्टिप्रभोः श्रीयमुनायाः श्रीमदाचार्यचरणानां च समानो धर्मः । भगवता व्रजस्थानां श्रीयमुनया अपि प्रभुसम्बन्धसम्पादनेन प्रभुप्राकट्यकरणेन च तासामेवाऽस्मत्स्वामिभिरपि तथाविधानामिदानीन्तनानामुद्धारात् । विशेषस्त्वेतावानेव । भगवता श्रीयमुनया च लीलासृष्टिस्थानामेव तथा करणम् । इदानीन्तनानां प्रभुपारोक्ष्येऽस्मत्प्रभुभिरिति । एवं च सति त्रयाणां सजातीय[1]धर्मवत्त्वं सिद्धम् । भगवान् विरहं दत्त्वा भाववृद्धिं करोति हि । तथैव यमुना स्वामिस्मारणात्स्वीयदर्शनात् ॥ अस्मदाचार्यवर्यास्तु ब्रह्मसम्बन्धकारणात् । तापक्लेशप्रदानेन निजानां भाववर्द्धकाः ॥ उद्धारोऽत्र भगवदासक्तिसम्पादनेन प्रपञ्चात्पृथक्[2]करणम् । तेन सर्वात्मभावदानमेव स इति बोध्यम् । एवकारोऽत्र प्रयोजनान्तराभावाय । एतेन मायावादखण्डनब्रह्मवादस्थापनकर्ममार्गप्रवर्त्तनादिकमानुषङ्गिकमिति सूचितम् । स्वरूपमाहुः—**आविर्भूतेति** । आविर्भूतो व्रजजनहृदयेभ्यो लीलाकरणार्थं यो वृन्दावनप्रियः सदानन्दस्तद्रूपास्त इत्यर्थः । यथा भगवान् लीलाप्राकट्यायैव रसात्माऽऽविर्भूतस्तथैतेऽपि श्रीभागवतविवृतिप्रकटीकरणेन तत्प्राकट्यार्थमेवाऽऽविर्भूता इति भावः । अथवा । वृन्दावनमेव प्रियं यासाम् । भगवद्विरहे तदर्थमपि तदपरित्यागात् । ताः स्वामिन्यः । आविर्भूताश्च तास्तथाभूताः । ता एवैत इत्यर्थः । स्वामिनीभावेन प्राकट्यदशायां सेवादिकरणात्तद्भाव[3]भावेन च तद्रूपत्वमिति भावः । वस्तुतो भावात्मा भगवान् । "रसो वै स" इति श्रुतेः । तदास्यरूपत्वादेतेऽपि तथा । श्रीयमुनाऽपि द्रवीभूतरसात्मकतत्स्वरूपत्वेन । तत्र यथा भगवतीव श्रीयमुनायामपि स्वामिनीभावेन स्त्रीरूपत्वं तेन च तत्र सर्वोऽपि भगवल्लीला भगवद्भावेन च भगवत्त्वं विरहे भगवत्स्वरूपतद्दर्शनेन स्वामिनीसुखाय तथाऽत्राऽपि प्राकट्यदशायां स्वामिनीभावेन सेवादिकृतौ

१ सजातीयधर्मवत्त्वे चेति क. २ पृथक्कारणमिति क. ३ तद्भावभावनेनेति ख.

तद्रूपत्वं[1] भगवद्भावेन भगवद्रूपत्वं विरहे तासामन्तरा[2]स्यप्राकट्येन स्वरूपसम्बन्धिसुखदानायेति बोध्यम् । अत एवोक्तं श्रीवल्लभाष्टके—"यस्मादानन्ददं श्रीव्रजजननिचय" इति । यद्वा । आविर्भूतं स्वस्वहृदयेभ्यो बहिःप्रकटीभूतं यद्वृन्दावनं तत्प्रियं यासाम् । अन्तःस्थितावपि बहिःप्राकट्यस्यैवाऽभिलषितत्वात् । अत एव "वृन्दावनं सखि भुवो वित[3]नोति कीर्त्तिमि"ति ताभिर्गीतम् । तथाच तादृक्[4]त्त[5]द्रूपत्वादसत्प्रभवोऽपि लीलाविष्करणाभिलाषिण इति ज्ञेयम् । तातचरणा इति सम्बन्धनिरूपणं तु पुष्टिमार्गीयाचार्यकरुणासिद्धिर्यथाकथञ्चित्सम्बन्धसिद्ध्यैव भवति न त्वन्यसाधनैरिति बोधनाय । देहेन भावतो वाऽपि सम्बन्धः फलसाधकः । पुष्टिमार्गे नाऽतिरिक्तं साधनं साधकं ततः ॥ नाऽयमात्मेत्युपनिषन्निषेधति यतोऽखिलम् । नन्दादयो देहजेन प्रादुर्भावेन गोपिकाः ॥ मयीति तत्कृपायोग्यत्वबोधनाय । सर्वसाधनराहित्येन केवलं तदीयत्वात् । अत एवैकवचनम् । अत एव सप्तश्लोक्यां तनोतु निजदासस्य सौभाग्यमिति प्रार्थना। विट्ठल इति नामग्रहणं नाम्नाऽपि तद्योग्यताद्योतनाय । ज्ञानशून्यानुग्राहकत्वं हि नामार्थः । तस्य चाऽऽचार्यकरुणामन्तरेणाऽसिद्धेस्तत्कृपयैव सामर्थ्यरूपया तादृशजनानुग्राहकत्वसिद्धिः । तदर्थमाचार्यवर्याणामेव प्रभुणा आविर्भावितत्वात् । अस्मिन्मार्गे कृपैव साधनं फलं चेति बोधनाय कृपयन्त्वित्यभिहितम् । इदं साधनफलरूपत्वञ्च "कृपायुक्तस्य तु यथा सिद्ध्येदि"ति "कृपानन्दः सुदुर्लभ" इति निबन्धनिरोधलक्षणग्रन्थीयवाक्याभ्यामवगन्तव्यम् । एवमेकेन पद्येन प्रभुभिः स्वाभीष्टप्रार्थनाप्रसङ्गेन निजाचार्यस्वरूपं निरूपितम् ॥ **विविधलीलोपयोगिनीमिति** । आचार्यचरणानां हि प्रभुलीलासंबन्धोऽभिलषितः । अत एवाऽग्रे तनुनवत्वप्रार्थनम् । स च तादृक्तत्संबन्धिपरितोषणेन भवति । तच्च यथास्थितरूपनिरूपणेन स्तुत्येति श्रीयमुनाया लीलासंबन्धित्वबोधनाय विविधलीलोपयोगिनीमित्युक्तम् । विविधाः स्वरूपगुणभेदेन सर्वा-

१ तद्रूप इति **ख.** तद्रूपत्वेति **घ.** २ तासामन्तरा स्वप्राकट्येनेति **ग.** ३ वितनोत्विति **घ.** ४ तादृग्रूपत्वादिति **ग-घ.** ५ तन्मयत्वादिति **ग-घ.**

नायाऽष्टभिः श्लोकैः स्तुवन्ति । साक्षाद्भगवत्सेवोपयोगिदेहाप्तितल्लीलाव-

त्सभावकामभावादिभेदेन[1] शास्त्रीयाशास्त्रीयप्रकाराभ्यां नानाप्रकारा या भगवतः स्वामिनीभिः सह लीलास्तासु अलौकिकशरीरसंपादकत्वेन प्रभुसंबन्धसंपादनेन भावजनकत्वादिभिश्च तथेत्यर्थः । **कालिन्दीमिति** । यद्यपि यमुनामिति वाच्यम् । तद्भिन्नत्वादस्याः । तथापि कालिन्दीमूलरूपत्वं तस्यां[2] बोधयितुं भगवति "देवकीजठरभूरि"ति वाक्यात् "देवकीसुतपदाम्बुजे"ति वाक्याच्च देवकीसुतत्वोक्तिवदत्राऽपि कालिन्दीत्वोक्तिरिति वेद्यम् । किञ्च । प्रभुसंबन्धप्रतिबन्धकदोषनिवृत्तये वा तथोक्तिः । कलिं दोषं द्यति खण्डयतीति कलिन्दस्तस्याऽपत्यमिति तादृग्धर्मवत्त्वेन भक्त[3]प्रतिबन्धनिवर्त्तकत्वात् । अत एवाऽग्रे "हरिप्रियकलिन्दये"त्यत्र तथैव व्याख्यातं प्रभुभिः । अनेन कालिन्दीपदस्याऽस्यां न धर्मवाचकत्वेन[4] नामत्वं किन्तु धर्मविशिष्टतद्वाचकत्वेन विशेषणत्वमिति सूचितम् । स्तोतुकामा इति काम एव पूर्वं[5] निरूपितः । अग्रे तु स्वरूपमाहात्म्यस्फूर्त्या स्तुतिकरण[6]मशक्यमिति "स्तुतिं तव करोति कः" इत्यनेन निरूपणीयमिति भावः । **श्रीगोकुलेश इति** । पुष्टिमार्गीयो लोकवेदाप्रसिद्धः पुरुषोत्तम एतत्पदेनोक्तः । तत्र लीलासृष्टिप्रवेशमन्तरा गमनाभावेन साक्षात्कारासम्भवात्परोक्षस्थितैर्[7]नमनमेव स्वदैन्याविष्कृतये कार्यं यथा तथा लीलासृष्टिप्रवेशमन्तराऽत्राऽपीति भावः । अत एवाऽऽचार्यवर्यैः—"नमो नमस्तेऽस्त्वृषभाय सात्त्वतामि"ति द्वितीयस्कन्धीयपद्यविवृतौ "गमनाभावान्नमनाधिकार" इत्यभिहितम् । **आदाविति** । अग्रे तु "मम मनः सुखं भावय" "ममाऽस्तु तव सन्निधौ तनुनवत्वमि"त्यादि प्रार्थनीयमिति भावः । नमनमेवेत्येवकारः पूर्वमग्रिमप्रार्थनीयास्फूर्त्त्या तदतिरिक्तव्यवच्छेदार्थः । **अष्टविधैश्वर्यमिति । भगवता दत्तमिति ।** अत्राऽयं भावः । भगवान् हि लोके स्वस्य रसात्मकं रूपं तादृशीं लीलां च

१ भेदेन चेति **ख.** २ अस्यामिति **ख.** ३ भक्तस्य प्रतिबन्धेत्यादि **ग-घ.** ४ धर्मिवाचकत्वेनेति **ख-ङ.** ५ पूर्वनिरूपित इति **ग-घ.** ६ स्तुतिकरणमप्यशक्यमिति **क-ख-घ-ङ.** ७ परोक्षस्थितैर्जीवैरिति **च.**

मुरारिपदपङ्कजस्फुरदमन्दरेणूत्कटाम् ।

लोकनतद्रसानुभवसर्वात्मभावादयः सकलसिद्धयो ज्ञेयाः । अत एव नमनं मुदपि[1] । जलदोषात्मकमुरस्याऽरेः पदपङ्कजयोः स्फुरन्तः सेवोपयो-

प्रकटयितुं प्रादुर्भूय सर्वात्मभाववतीषु तथा लीलां चकार । तत्र तदधीन-त्वमङ्गीकृत्य सर्वोऽपि कृतिस्तदतिरिक्तास्फूर्त्तिश्च । अन्यथा रसात्मकत्वं न स्यात् । एवं सति सर्वमेतदैश्वर्यविरोधीति लीलासृष्टौ तत्कार्यार्थं लीलोपयो-गिन्यां स्वामिनी[2]भगवत्सम्बन्धिन्यां श्रीयमुनायां तत्स्थापितवानिति भगवता दत्तमित्युक्तम् । स्वयं तु रसात्मकत्वेन तदधीनस्तदतिरिक्तस्फूर्त्तिरहितश्चेति । तच्चैश्वर्यमष्टविधं पुष्टिमार्गीयम् । तथाहि । सकलसिद्धिहेतुत्वं, भगवद्भाववर्द्ध-कत्वं, भगवत्संबन्धप्रतिबन्धनिराकरणेन तदनुभवयोग्यताहेतुशुद्धिसम्पाद-कत्वरूपं भुवनपावनीत्वं, भगवत्समानधर्मवत्त्वादनायासेन तत्संबन्धसंपा-दकत्वं, भगवत्प्रियकलिनिवारकत्वं, भगवदीयोत्कर्षाधायकत्वं, भगव-त्प्रियत्वसंपादकत्वं, तनुनवत्वसाधकत्वं चेति । इदं च लीलासृष्टिस्थेष्वेव ज्ञेयम् । तत्रैव तदधिकारात् । आधुनिकानां तु तदर्थप्रकटिततदास्यरूपा-देव सर्वमिति विमर्षः[3] । सिद्धिस्वरूपं विवृण्वन्तीतरवैलक्षण्याय सिद्ध्यन्तर[4]-भ्रमनिवारणाय[5] च[6]—**साक्षादित्यादिना** । स्वरूपादिषु परम्परासेवने तु नाऽलौकिकं देहमपेक्ष्यते । किन्तु निवेदनाख्यसंस्कारसंस्कृतं लौकिकमेव । तत्र भगवतोऽपि सावरणत्वेन जीवस्य साक्षात्स्पर्शाभावात् । लीलाप्रवेशे तु साक्षात्स्पर्शाय तदपेक्षेति साक्षात्पदमुक्तम् । लीलावलोकनमपि सिद्धिरेव । यथा योगजधर्मेण योगिनामतीन्द्रियपदार्थदर्शनसिद्धिस्तथा श्रीयमुनासेवन-धर्मेणाऽपि गुणातीतप्रभुलीलादर्शनसिद्धिरिति भावः । तथा तद्रसानुभ-वश्च लीलोपयोगिन्योभयसंबन्धिन्या मध्यस्थयैव भवतीति तदनुभवरूपा सिद्धिरप्येतत्सेवनेन भवतीत्यर्थः । सर्वात्मभावसिद्धिरपि भगवत्स्वरूप-

१ मुदेति **क-ग.** २ स्वामिनीभावदित्यादि **ग-घ.** ३ सर्वत्र मूर्धन्यान्त एव पाठ उपलब्ध इति स एव स्वीकृतः । ४ सिद्धान्तान्तरेति **ग-घ.** ५ निराकरणा-येति **ङ.** ६ चेति नास्ति **ङ.**

तटस्थनवकाननप्रकटमोदपुष्पाम्बुना
सुरासुरसुपूजितस्मरपितुः श्रियं बिभ्रतीम् ॥ १ ॥

गिदेहादिसम्पादनोन्मुखा ये रेणवोऽमन्दा व्रजसुन्दरीवृन्दचरणरेणुसाहित्येनाऽनल्पास्त उत्कटा जलापेक्षयाऽधिका यत्र। एतेन दोषभयं भगवत्प्राप्तिविलम्बश्चाऽपास्तः। अग्रे स्पष्टम्। जलदर्शनस्य भगवत्स्मारकत्वं

त्वात् भगवतैव तद्धृदयग्रहणेन वशीकरणाद्भवतीति तत्सेवनाधीनैवेत्यर्थः। अत एवोक्तं प्रभुभिरेतदष्टपद्याम्—"धारितश्रीकृष्णयुतभक्तहृदय" इति। आदिपदाद्वियोगेऽप्यन्तःप्राकट्यात्कोशप्रतिमान्यायेन भगवदाविष्टदेहसिद्धिः, परावृत्तचक्षुषाऽन्तराविर्भूतप्रभुलीलावलोकनसिद्धिः, भावात्मकस्वस्वरूपेण तदात्मकतद्रसानुभवसिद्धिः, विरहसामयिकसर्वात्मभावसिद्धिः। स च बहिर्भगवत्प्राकट्यापेक्षाराहित्येनाऽऽन्तरतद्भावनारूपो वेद्यः। एवमष्ट सिद्धयो ज्ञेयाः। **अत एवेति**। यत एतादृशोत्कर्षवत्त्वमस्यामस्तीति स्फूर्तिरत एव स्वनमनमेवम्भूतश्रीयमुनाप्राकट्येनाऽलभ्यलाभान्नमने हेतुर्मुदेवेति मुदपीत्युक्तमित्यर्थः। **जलदोषात्मकेति**। भक्तानां भगवत्संबन्धे भगवतश्च भक्तसंबन्धे जलं प्रतिबन्धकम्। पारस्थिततदप्राप्तेः। तस्य च न श्रीयमुनावन्मार्गदातृत्वम्। तथा सति प्रतिबन्धकं न स्यात्। अतो दैत्यसंबन्धादेवेदं जलं प्रतिबन्धकम्। अतो न जलस्य दोषः। तस्य तूपायेनाऽपि प्रापकत्वात्। तस्माज्जले यो दोषो भगवत्प्राप्तिप्रतिबन्धकरूपः स मुर एवेति तस्मिन्निवृत्ते स्वत एव भगवत्प्राप्तिरिति जलदोषात्मकेत्युक्तम्। **एतेनेति**। चरणरेणुषु मुरारिसंबन्धेन स्फुरत्पदबोधितसेवोपयोगिदेहादिसंपादनोन्मुखत्वकथनेन चेत्यर्थः। तथाच स्वप्रयत्नदोषनिवारकसंबन्धेन चरणरेणूनां कार्योन्मुखत्वनिरूपणेन च तदुभयमपास्तमिति भावः। **सुरासुरसुपूजितेति मूले**। वस्तुतस्तु

---

१ भगवतेव तद्धृदयेत्यादि **क-ख-घ-ङ.** २ स्वरूपेणेति **क-ङ.** ३ मुख्य एवेति **घ.** ४ एतेनेत्यारभ्य तदुभयमपास्तमिति भाव इत्यन्तो ग्रन्थः "सुरासुरेत्या"रभ्य "तथैव तत्सत्त्वादि"त्यन्ताद्ग्रन्थात्परतो लेखकदोषात्सर्वत्र पतितः **क-ख-ग-घ-ङ.** **च**पुस्तके तु यथानिवेशमुपलब्धः। एष एव च युक्तः। व्याख्येयविवृतिक्रमानुरोधात्। ५ वस्तुतस्त्वित्यादिर्ग्रन्थो नास्ति **क-ग-घ.**

कलिन्दगिरिमस्तके पतदमन्दपूरोज्ज्वला
विलासगमनोल्लसत्प्रकटगण्डशैलोन्नता ।

भावजनकत्वं च ज्ञापयितुं स्मरपितृपदम् ॥ १ ॥ आविर्भावप्रकार-माहुः—कलिन्देति । रविमण्डलाददतिदूराद्गिरिमस्तके पाते फेनेन प्रवाह-

---

सर्वात्मभावकामभावयुतस्वामिनीभिः पुष्पाभरणैरलङ्कृतः सन् भावजनक इत्यर्थः । दार्ष्टान्तिके तु[1] तत्पूजितत्वं दैन्यभावमानभावयुतोभयविधस्वामिनीपूजितत्वेन ज्ञेयम् । दैन्यभाववतीनां प्रभुप्राकट्यार्थं मानभाववतीनामनुनयकरणार्थं तत्पूजनात् । पूजनं चाऽत्र तत्परतयाऽनुसरणमेव । दृष्टान्ते तथैव तत्सत्त्वादिति भावः । **भगवत्स्मारकत्वमिति** । स्मरपितृपदे स्मरपदेन स्मरणमुच्यते । तज्जनकत्वं च । स्मरणं स्मर इति व्युत्पत्तेः । अत एव च्छान्दोग्योपनिषदि "स्मरो वा आकाशाद्भूय" इत्यत्र स्मरणमेव स्मरपदेनाऽभिमतम् । कामस्य त्वत्राऽप्रसक्तेः[2] । दोषनिरूपणप्रस्तावे हि तन्निरूपणं घटते । न तु सर्वविज्ञानायोत्तरोत्तरं भूयो निरूपणप्रस्तावे । तथाच श्रीयमुनायामपि तादृग्भगवच्छ्रीधारकत्वोक्त्या प्रभुधर्मस्मरणजनकत्वसत्त्वेन[3] भगवत्स्मारकत्वमिति भावः । भावजनकत्वं[4] तु कामजनकभगवच्छ्रीधारकत्वेन स्पष्टमेव । तदा स्मरपदं कामवाचकमेव । तेनाऽत्र स्मरपदेऽर्थद्वयमप्यभिप्रेतमित्यर्थः । तथाच यथा भगवति दृष्टे "निरीक्ष्य रूपं यद्गोद्विजद्रुममृगा" इति वाक्याद्भावजननं पूर्वानुभूतलीलाविशिष्टप्रभुस्मरणं तथा तादृग्भगवत्स्वरूपायामेतस्यां दृष्टायामपीति भावः ॥ १ ॥ भगवत इवाऽलौकिकप्रकारेणाऽत्राऽऽविर्भाव इति ज्ञापनायाऽऽहुः—**आविर्भावप्रकारमिति** । यथा भगवान्वसुदेवदेवकीसमक्षमा-

---

१ अपीति **ग-घ.**   २ तत्राऽप्रसिद्धेरिति **ग-घ.**   ३ प्रभुधर्मस्मरणजनकसत्त्वेनेति **क.** प्रभुस्मरजनकसत्त्वे इति **ग.** प्रभुस्मरणजनकसत्त्वे इति **घ.** प्रभुधर्मस्मरणजनकत्वेनेति **ख-ङ-च.** प्रतिभाति त्वेवम् ।   ४ भावजनकत्वमित्यारभ्य स्पष्टमेवेत्यन्तोंऽशो नास्ति किन्तु "भगवत्स्मारकत्वमिति भाव" इतीयं पूर्वपङ्क्तिरेव "भगवत्स्मारकत्वं स्पष्टमेवे"ति रूपेण वर्त्तते **ग-घ.**

सघोषगतिदन्तुरा समधिरूढदोलोत्तमा
मुकुन्दरतिवर्द्धिनी जयति पद्मबन्धोः सुता ॥ २ ॥

जलेन चोज्ज्वला । उच्चनीचशैलारोहावरोहौ विलासगतिरूपौ । तत्रोल्लसन्तः शोभां प्राप्नुवन्तः प्रवाहवेगेनोच्चैः क्षिप्ता अत एव प्रकटाः सर्वेषां दृश्यास्तैस्तादृशैस्तथा । उच्चतः पाते शोभामुक्त्वा ततो विषमभूमिगतिशोभामाहुः—सघोषेति । दन्तुरशब्देन विविधविकारवत्त्वमुच्यते । "विपुलपुलकभरदन्तुरितम्" "केतकीदन्तुरिताश" इत्यादिजयदेवोक्तिरपि । व्रजजनगोवृन्दादिविविधगतिभिस्तादृशीव । घोषः शब्दो व्रजो वा ।

विर्भूतो वरदानाय यथा वा तपसा पूर्वानुभूतभगवद्विरहेण च तापात्मकात्तदुभयहृदयात् यथा वा आविर्भूयाऽन्यत्र केवललीलास्थाने गोकुले प्रयातस्तत्र गत्वा सर्वात्मभाववद्भक्तसंवलितो जातस्तत्र लीलां च प्रकटितवान् तथा श्रीयमुनाऽपि प्रथमं सूर्यमण्डलान्तर्वर्त्तिनारायणहृदयादानन्दमयादाविर्भूता द्रवीभूतरसात्मिका ततस्तापात्मकाद्रविमण्डलात्कलिन्दोपरि समागत्य भूमावागता ततो लीलास्थाने समागत्य तादृग्भक्तसंवलिता जातेत्यर्थः । घनीभूतरसात्मा हि जातो नन्दगृहे हरिः । केवलो धर्मयुक्तस्तु वसुदेवगृहे तथा ॥ शब्दात्मा गुणगानादौ वदनादुद्गतः स्वतः । द्रवीभूतरसात्मैषा सर्वाङ्गीणश्रमाम्बुभिः ॥ नारायणस्य हृदयाच्छुद्धसत्त्वस्वरूपतः । प्रादुरासीन्मूलरूपपुष्टिलीलाप्रसिद्धये ॥ **विषमभूमीति** । पर्वतसंबन्धित्वादित्यर्थः । वैषम्यं चाऽत्राऽल्पानल्पप्रस्तरसाहित्येनेति ज्ञेयम् । **घोषः शब्दो व्रजो वेति** । "घोष आभीरपल्ली स्यादि"ति कोषात् घोषो व्रजस्तेन सह वर्त्तन्ते न कदाचिदपि तं विहायाऽन्यत्र प्रयान्ति निरोधस्थानत्वात्ते सघोषा व्रजजनादयस्तेषां तीरे गतिभिस्तथेत्यर्थः । शब्दपक्षे यथा प्रियाभिमुखं गच्छन्ती प्रिया अन्तरुद्गतरजोगुणजनितकामावेशेन गायन्ती[1] तथोच्चैर्भाषमाणा गच्छति तथेत्यर्थः । व्रजपक्षे तु भाववत्संसर्गे भाववतां भावोदयजनितविविधविकारवत्त्वं लोकसिद्धमिति श्रीयमुनाया-

---

१ गायंति इति ग.

भुवं भुवनपावनीमधिगतामनेकस्वनैः
प्रियाभिरिव सेवितां शुकमयूरहंसादिभिः ।

अनतिस्थूलशिलासु गतिशोभया(?)। असमधिरूढेव समधिरूढदोलोत्तमा। ततो भूमावागत्य मुकुन्दरतिवर्द्धिनी जाता । यतो रसाकरसखस्य सुता । अतः स्वयमपि रसात्मिकेति भावः ॥ २ ॥ भुव्यागताया धर्मानाहुः— भुवमिति । प्रयोजनम्—भुवनपावनीमिति । अनेकस्वनैरिति शुकादिवि-

---

मपि तथा निरूपितमित्यर्थः । **असमधिरूढेवेति** । पदच्छेदे अकारस्याऽपि प्रतीयमानत्वादसमधिरूढत्वमपि व्याख्येयम् । तथाचाऽसमधिरूढेव समधिरूढदोलोत्तमा । यतो दोलाधिरोहेऽपि न तथा प्रतीतिः । भगवत्सांमुख्यगमने तद्भाववैवश्येन गमनमात्रस्फूर्त्याऽऽरोह्यदोलास्फूर्त्तेरसमधिरूढेवेत्युक्तम् । **ततो भूमावागत्येति** । यथा भगवतो मथुरातो व्रजे समागतस्यैव स्वामिनीभाववर्द्धकत्वं तथा रविमण्डलादाविर्भूय कलिन्दपर्वतोपरि पतित्वा ततः कालिन्दीं स्वप्रविष्टां विधाय व्रजभूमौ समागताया एव लीलासृष्टिस्थेष्वेव मुकुन्दरतिवर्द्धिनीत्वमित्यर्थः । मुकुन्दरतिवर्द्धिनीत्यत्र षष्ठीसमासो ज्ञेयः । तथाच मुकुन्दस्य भगवतः स्वामिनीषु रतिवर्द्धिनी । तस्या उभयसंबन्धिनीत्वादिति भावः । रतिवर्द्धिनीत्वे हेतुरेव यतो रसाकरसखस्य सुतेत्यादिना निरूपितः ॥ २ ॥ **भुव्यागताया धर्मानिति** । भुव्यागमनं हि भगवतो रतिवर्द्धनाय । तत्र च ये धर्मास्तदनुकूला अपेक्ष्यन्ते विभावादिसामग्रीसेविकासाहित्यस्वरूपसौन्दर्यादयस्तानित्यर्थः । **प्रयोजनमिति** । रविमण्डलाद्भुव्यागमनप्रयोजनमित्यर्थः । **भुवनेति** । भुवनं लोकः सर्वोऽपि लीलासृष्टिस्थतदतिरिक्त-

---

१ "अनतिस्थूलशिलासु गतिशोभये"त्ययं पाठांशः श्रीहरिरायाणामनभिप्रेत इव भाति । प्रतीकाग्रहणाद्व्याख्यानाभावात्पूर्वापरतद्व्याख्यालोचनेनाऽनन्वितत्वभानाच्च । एवमपि सर्वत्र विवृतिपुस्तकेषु तत्तद्भिन्नविलक्षणपरस्सहस्राशुद्धिपूर्णनिजाग्रपाठत्वेऽपि न वियन्त्येतान्यक्षराणि व्याख्यातानि च स्वव्याख्यायां श्रीमत्पुरुषोत्तमैरिति स्वस्यैव व्याख्याव्याख्येयानवबोधं मन्वानाः सन्देहचिह्नमत्र विन्यस्यामः । २ सेवकसाहित्येति च.

तरङ्गभुजकङ्कणप्रकटमुक्तिकावालुका-
नितम्बतटसुन्दरीं नमत कृष्णतुर्यप्रियाम् ॥ ३ ॥

शेषणम् । एतेन विभावादिसामग्र्युक्ता । यत्र यथोचितं तत्र तथा कुर्वन्तीति क्रियापदम् । तीरस्य चाकचक्यवत्सिकताकृतशोभां तत्स्वरूपमप्याहुः—तरङ्गेति । यदा तरङ्गास्तीरमागत्य प्रसृता भवन्ति तदा तीरसिकता मुक्तावद्भासन्ते । ता न सिकताः । लोकप्रतीतिः परं तथा । किन्तु तरङ्गा एव भुजास्तत्र यानि कङ्कणानि तत्र प्रकटा या मुक्तिका मुक्ताफलानि तान्येव वालुकावत्प्रतीयमानानि तद्युक्तो यो नितम्ब एवोच्चदेशात्मकतटस्तेन तादृशीम् । भगवति स्नेहातिशयो विशेषणेनोक्तः ॥ ३ ॥

रूपस्तस्य भगवद्भावान्यभावराहित्यसम्पादनभगवत्सेवनार्हशरीरसम्पादनाभ्यां पावनीं शोधिकामित्यर्थः । शुद्धिरत्र पुष्टिमार्गीयैव वाच्या । सा च पूर्वोक्तरूपैवेति तथेति भावः । **भगवति स्नेहातिशय इति** । तरङ्गभुजेत्यादिविशेषणेनाऽप्राकृताखिलाकल्पभूषितत्वबोधकेन तथाविधे भगवति सजातीयतया स्नेहातिशयो द्योतित इत्यर्थः । अप्राकृतानामप्राकृते वस्तुनि प्रीतिभरसम्भवस्योचितत्वादिति भावः । **नमत कृष्णतुर्यप्रियामिति मूले** । तत्राऽयमाशयः । अत्र स्तोत्रे विविधलीलोपयोगिनी श्रीयमुना प्रस्तूयते । तत्र च कृष्णतुर्यप्रियात्वमनुपपन्नम् । तस्य धर्मस्य कालिन्दीनिष्ठत्वात् । इयं च ततो भिन्ना । "वसामि यमुनाजल" इति वाक्यात् । यद्यप्यस्यामभेदेन भगवति देवकीपुत्रत्ववत्कालिन्दीत्वं वक्तुं शक्यम् । न तु तुर्यप्रियात्वम् । तदधिष्ठानत्वेन तद्रूपत्वोक्त्यौचित्येऽपि तद्धर्मवत्त्वोक्तेरनुचितत्वात् । असाधारणधर्माणां तद्रूपमात्रनिष्ठत्वेनोपासकैरन्यत्राऽविभावनीयत्वात् । अन्यथा भावने "योऽन्यथा सन्तमात्मानमि"ति वाक्याद्दोषश्च । न हि सीतापतिः पुरुषोत्तमोऽपि रसात्मकश्रीगोपीजनवल्लभत्वेनोपासकैर्विभाव्यते । अन्यधर्मवत्त्वेनाऽन्यरूपभावने "तं यथा यथोपासते तथैव भवति तद्धैतान् भूत्वाऽवती"ति श्रुतेः स्वाभीष्टसाक्षात्काराभावेन फला-

१ रसात्मकः श्रीगोपीजनेत्यादिः सविसर्गः पाठः ग-घ-ङ-च. २ तद्धैतानिति च. तद्वैनानिति ख.

अनन्तगुणभूषिते शिवविरञ्चिदेवस्तुते
घनाघननिभे सदा ध्रुवपराशराभीष्टदे ।

भगवत्समानधर्मत्वं ज्ञापयितुं तथा विशेषणैराहुः—अनन्तेति । प्रभौ सप्तम्यन्तानि विशेषणानि । तत्प्रियायां सम्बुद्धिरूपाणि । घनाघनशब्दो

सिद्धेः । ननु रूपान्तरदर्शनोद्गतभावस्य रूपान्तरेण कथं फलसिद्धिर्यथा र[1]घुपतिवर्यवितीर्णवरस्य श्रीव्रजनाथेनेति चेत् । सत्यम् । तत्र हि श्रीरघुनाथस्य गुरोरिवोपदेशद्वारा फलप्रापकत्वं स्वाविष्टमूलरूपत्वेन न तु साक्षात्तद्दातृत्वम् । मर्यादापुरुषोत्तमत्वात् । न हि तेन पुष्टिमार्गाङ्गीकारस्तत्फलदानं च शक्यते विधातुम् । तत्त्वं च दाम्पत्यरसात्मकत्वेन तद्धर्मसहितत्वम् । तत्र मर्यादया फलदानाद्भगवन्मार्गीयगुरुणेव त[2]द्विधिनिरूपणेन । अतस्तदुक्त्यनुपपत्तिरिति चेत् । अत्र वदामः । व्रजे हि भगवद्भोग्याः स्वामिन्यश्चतुर्विधाः । तत्रैका मुख्या भगवतः स्वामिनी सर्वविलक्षणा । अस्यां चाऽनन्यपूर्वान्यपूर्वोभयरूपत्वाभावः । भगवतो रसात्मकस्य श्रुतिसिद्धस्याऽऽलम्बनविभावत्वेन तथात्वसम्पादकत्वात् । श्रुतिरूपा गोपगृहेषु स्थिताः सर्वात्मभाववत्यः प्रौढा एकाः । तथा कुमारिका व्रजस्था अनन्यपूर्वा विवाहाभावेऽपि वसना[3]दानेन स्वकीयाः कृताश्चाऽपराः । चतुर्थी श्रीयमुना । तस्यामपि क्रीडाव्याजेन सर्वाङ्गसंबन्धसंपादनेन स्वातन्त्र्येण तया सह क्रीडेति सा चतुर्थी । अत एवैतदभिप्रायेण तत्र तुर्यप्रियात्वोक्तिर्न तु तुर्यभार्यात्वोक्तिरिति नाऽनुपपत्तिः काचित् ॥ ३ ॥ **भगवत्समानधर्मत्वं ज्ञापयितुमिति ।** भगवान् हि षड्गुणैः स्वरूपेण च सप्तविधः । तत्र गुणाः षड् ऐश्वर्यादयः । तेऽपि पुष्टिमार्गीयमर्यादामार्गीयतद्भेदेन द्विविधाः । तत्र पुष्टिमार्गीयाः षट् फलप्रकरणे वेणुगीते च—"धन्यास्त्वि"ति श्लोकषट्केन निरूपिताः प्रभुचरणैः । तेऽत्राऽपि तत्समानसङ्ख्याकैर्विशेषणैः श्रीयमुनायां निरूप्यन्ते । तथाहि । सप्तम्यन्तप्रभुविशेषणपक्षे अनन्ता असङ्ख्याता नित्याश्च ये गुणास्तैर्भूषिते

---

१ रघुवर्येति क-ङ. २ तद्विधिनिरूपणेन फलदातृत्वमिति च. ३ वसनदानेनेति क-ग-घ-ङ-च.

विशुद्धमथुरातटे सकलगोपगोपीवृते

निपातरूपो घनसमुदायं वदति । श्यामे । तादृशीति वा । ध्रुवादेस्तत्तीर एव प्रभुप्राकट्यात्तथा । विशुद्धा मथुरा तटे यस्याः । सा निकटे वा

अलङ्कृते प्रभावित्यर्थः । सम्बुद्ध्यन्ततया श्रीयमुनापक्षे अनन्तस्य नित्यस्य रासोत्सवादिषु बहुरूपस्य वा भगवतो ये गुणा भक्तकार्यसाधकत्वादयस्तैर्भूषिते[1] इत्यर्थः । एतेन सर्वसद्गुणसततसाहित्यात् "गुणाः सर्वत्र पूज्यन्त" इति वाक्यात् "पूज्यो हि भगवान् तद्गुणाश्चे"त्याचार्यचरणवचनाच्च गुणानां पूज्यतावच्छेदकधर्मरूपत्वात् "ईश्वरः पूज्यते लोके मूढैरपि यदा तदे"ति श्लोकनिरूपितमैश्वर्यं निरूपितमिति भावः । शिवविरञ्चिदेवस्तुते इति विशेषणेन पक्षद्वयेऽपि "वीर्यं देवेष्वि"त्यत्र निरूपितं वीर्यं निरूपितमित्यर्थः । घनाघननिभे इति विशेषणेन पक्षद्वयेऽपि स्वरूपसौन्दर्यं सर्वविस्मारकं विश्वजीवनत्वादिकं च निरूपितमिति "यशो यदि विमूढानां प्रत्यक्षासक्तिवारणादि"त्यत्रोक्तं यशो निरूपितमित्यर्थः । ध्रुवपराशराभीष्टदे इति विशेषणेन स्वसेवकानामप्यैश्वर्यज्ञानरूपाभीष्टप्रदानेन तेषामपि तद्योगात् "श्रियो हि परमा काष्ठा सेवकास्तादृशा यदी"त्यत्रोक्ता श्रीर्निरूपितेत्यर्थः । **विशुद्धमथुरातटे इति** । अत्राऽयमर्थः । मथुरा हि विशुद्धा । सर्वदोषराहित्यात् । न हि तत्र भूम्यादिदोषाः सम्भवन्ति । तत्त्वान्युत्पाद्य "तत्सृष्ट्वा तदेवाऽनुप्राविशदि"ति श्रुतेः कारणतया तेषु प्रविष्टस्य भगवतो भूमितत्त्वैकदेशरूपमथुराया नित्यस्थितिस्थानत्वात् । अत एव जीवानां "काश्यादिपुर्यो यदि सन्ती"ति वाक्यात्सा सर्वैः प्रकारैर्मोक्षदात्री । तादृश्या अपि श्रीयमुनातटे सत्त्वेन लीलास्थानतया यत्र भगवाँस्तल्लीलाविशिष्टः प्रकटस्तत्र सेत्येवं निरन्तरप्रभुसान्निध्येन भक्तिदायकत्वात् "ज्ञानोत्कर्षस्तदैव स्यात्स्वभावविजयो यदी"त्यत्रोक्तं ज्ञानं निरूपितम् । **सकलगोपगोपीवृत इति** । परोक्षेऽपि भक्तानां भगवत्संबन्धमाकाङ्क्षमाणानां तत्रैव[2] भगवत्सं-

१ भूषित इत्यर्थ इति **क-ग-घ-ङ-च.** भूषिता इत्यर्थ इति **ख.** युक्तस्त्वेवम् ।
२ तत्रैवमिति **च.** तत्रैवेत्यारभ्य भवतीति सर्वदेत्यन्तोंऽशो नास्ति **ग.**

कृपाजलधिसंश्रिते मम मनस्सुखं भावय ॥ ४ ॥

यस्य । निरवधिकृपायुक्तो हरिस्तस्मिन् । अन्या नदी लौकिकं जलधिं सङ्गता भवति । इयं तु तादृशं श्रीव्रजेशं संश्रिता । एतेन त्वत्सङ्गतो भगवत्सङ्गतो

बन्धोऽनुभूत इति तदाशया सततं तामावृत्य स्थितिरिति तत्सङ्गः सर्वदा । स[1] च निरुपधिभगवत्सम्बन्धिभावेनैव भवतीति सर्वदा भगवत्प्रीत्या भगवतोऽपि भक्तसम्बन्धसंपादकतया व्रजभक्तानां च मानादिदोषनिवारकतया तापहारकत्वेन च "हरेश्चरणयोः प्रीतिः स्वसर्वस्वनिवेदनात् । उत्कर्षश्चाऽपि वैराग्ये हरेरपि हरिर्यदी" त्यत्रोक्तं वैराग्यं निरूपितमित्यर्थः। एवं षड्भिर्विशेषणैः षड् धर्मान्निरूप्य धर्मिस्वरूपं निरूपयन्ति—**कृपाजलधिसंश्रित इति** । प्रभुविशेषणपक्षे निरवधिकृपायुक्तत्वेन स्वरूपमेवाऽभिहितं न धर्मः । करुणायास्तु[2] नित्याविर्भूतधर्मत्वेन स्वरूपमध्यपातात् । अन्ये धर्मा नित्या अपि लीलोपयोगिनस्तत्तल्लीलायां प्रकटीक्रियन्ते नाऽन्यदा । करुणा तु सर्वदाऽऽविर्भूतैव स्वरूप इति सदा तद्युक्तत्वात्स्वरूपमेव सेति भावः । श्रीयमुनापक्षे कृपाजलधिरपारकरुणो भगवांस्तं सम्यगविच्छेदेन श्रितेति मुख्यस्वामिनीवदर्धनारीनरवद्वा तत्स्वरूपमेवोक्तमिति भावः । **मम मनस्सुखं भावयेति** । पूर्वोक्तधर्मवति हरौ मम मनस्सुखं भावेनाऽनुभूयमानानन्दस्तं भावय विचारय कथं स भविष्यतीति । तद्विषयिणीं चिन्तां कुर्वित्यर्थः । अनेन त्वच्चिन्तयैवाऽयमानन्दः प्राप्यो नाऽन्यसाधनैरिति भावो निरूपितः । संबुद्धिपक्षे मम मनसि भगवत्स्वरूपानुभवजन्यं यत्सुखं तत् त्वं भावय स्वमनस्यानयेत्यर्थः । अनेन त्वच्चेतसि समागतावेव तत्सुखं सर्वदाऽनुभवविषयो भवति । भगवताऽष्टविधैश्वर्यस्य त्वयि निक्षिप्तत्वात् स्वयं त्वदधीनः सर्वदाऽनीश्वर इवेति त्वद्विचारेणैव तद्भवतीत्यभिप्रायः सूचितः । एतेनेत्यादिना तव सर्वदा तद्द्रवीभूतरसा-

---

१ सच निरुपधिभावेनैवेति क-घ. सर्वनिरुपमभावेनैवेत्यादि ङ. २. करुणायाः स्वनित्याविर्भूतधर्मत्वेनेत्यादिः ङ.

यया चरणपद्मजा मुररिपोः प्रियम्भावुका
समागमनतोऽभवत्सकलसिद्धिदा सेवताम् ।

भवतीति भावः सूचितः ॥ ४ ॥ अथ भगवदीयानामप्युत्कर्षाधायिका या तदुत्कर्षं को वक्तुं शक्त इति भावेनाऽऽहुः—ययेति । चरणपद्मजा गङ्गा । तेन भक्तिमार्गीया । निर्दोषपूर्णगुणाऽपि यया त्वया सह समा-

त्मकत्वेन लीलाविशिष्टप्रभुसङ्गतत्वाद्येन केनाऽपि संबन्धेन त्वत्सङ्गतौ तादृक्प्रभुसङ्गतिरेव जातेत्याशयोऽत्र[1] बोध्यः ॥ ४ ॥ अथेत्यर्थान्तरोपक्रमे । पूर्वं चतुर्भिः श्लोकैरुत्कर्षवर्णनेन स्तुतिः कृता । अतः परमुत्कर्षवर्णनस्याऽशक्यत्वनिरूपणेन सा निरूप्यत इत्यर्थः । **भगवदीयानामपीति** । भगवता भगवदीयत्वरूपपरमोत्कर्षं प्रापितानामपीत्यर्थः[2] । **चरणपद्मजेति** । चरणजेत्येतावतैव चारितार्थ्येऽपि पद्मपदोपादानस्याऽयमाशयः । यथा पद्मजो ब्रह्मा भगवतः पपञ्चे क्रीडार्थं भगवदाज्ञां च प्राप्य प्रपञ्चं सृष्टवान् स्वयं निरपेक्षस्तथेयमपि स्वगतभगवच्चरणरेणुभिः सेवौपयिकदेहसंपादनेन भगवतो भक्तिमार्गप्रकटनेच्छामवगत्य स्वयमनपेक्षैव भगवत्क्रीडार्थं भगवदीयजनान् सृष्टवतीति[3] । अत्र ब्रह्मवदाज्ञाऽभावोऽस्या भगवति साक्षात्संबद्धत्वेन[4] हार्दवित्तया । न हि हार्दविदो लोकेऽप्याज्ञाप्यन्ते । अतिचतुरत्वादिति भावः । **तेनेति** । चरणपद्मजात्वेनेत्यर्थः । चरणं हि निर्दोषपूर्णगुणं भक्तिरूपं च तज्जातत्वेनाऽस्यामपि तद्गुणसङ्क्रमः । तथा[5]चाऽन्येषामपि सेविनां तथा करणमुचितम् । कारणगुणा हि कार्यगुणानामारम्भका इति न्यायादिति भावः । **यया त्वयेति** । त्वया पुष्टिमार्गीयया सर्वाङ्गसंबन्धिन्या मिलनतो मुररिपोर्भक्ते[6]प्रतिबन्धनिवर्त्तकस्याऽत एव तद्दुःखहर्त्तुः प्रियम्भावुका । यथा श्रीयमुना साक्षात्सेवोपयोगिदेहसंपादनेन[7] सेवकसृष्टि[8]करणात्तत्कृतसेवया[9] प्रियम्भावुका । तथा गङ्गा श्रीयमुनासङ्गानन्तरं तद्गत-

१ अत्रेति नास्ति **क-ग-घ-ङ-च.** २ अपिर्नास्ति **ख.** ३ सृष्ट्वा स्थितवतीति इति **च.** ४ संबन्धत्वेनेति **क-ख-ग-घ-च.** ५ तथाऽन्येषामिति **ख.** ६ भक्तीति **ग.** ७ देहादसम्पादनेनेति **क-ग-घ.** देहप्रतिपादनेनेति **ख.** ८ सेवकसृष्टिकर्तृकत्वादिति **ग-घ.** ९ तत्कृतसेवायामिति **च.**

तया सदृशतामियात्कमलजा सपत्नीव य-
द्धरिप्रियकलिन्दया मनसि मे सदा स्थीयताम् ॥ ५ ॥

गमनतो मिलनतो हरेस्तथाऽभवत् । सेवतां च तथा । पूर्वं गङ्गाया अन्यसङ्गतिजनितमुत्कर्षमुक्त्वा भगवत्सङ्गतिजनित उत्कर्षः पठितः "सा राजन् दर्शनादेव ब्रह्महत्यापहारिणी"त्यादिरूपः । एतादृश्या त्वया सह सदृशतां किं काऽपीयादिति काकूक्तिः । यदीयात् कमलजेयात् । तत्र हेतुमाहुः । यद्यस्मात्सा भगवत्पत्नीत्वात्सपत्नी भवति । तत्रा[1]पि भवती प्रियेति—इवेति । भक्तानुगुणत्वमाहुः । हरिप्रियाणां कलिं दोषं द्यति ख-

---

सरश्रमजलाणुसंबन्धे साक्षात्सेवोपयोगिदेहादिसंपादनपूर्वकं सेवा[2]कारणा-त्तथा जाता । सेवतां भवन्मिलितगङ्गासेवकानां च पूर्वोक्तसकलसिद्धिदा जातेत्यर्थः । अयमुत्कर्षः स्वानुभवेनोक्तः । परं नाऽत्र चित्रं किञ्चित् । यो हि यदाविष्टः स तदा तत्कार्यं करोति । भगवदाविष्टभक्त इव । अत एव "कस्याश्चित्पूतनायन्त्या" इत्यादिवाक्यानीति नाऽनुपपत्तिः । **पूर्वमिति** । यद्यपि पूर्वमाचार्यवर्यप्राकट्यात्पूर्वं पुराणादिष्वपि सरस्वतीसङ्गतिजनित-मुत्कर्षमभिधाय [3]भवतीसङ्गतिज उत्कर्षः पठितः । परन्तु "सा राजन् दर्शनादेव ब्रह्महत्यापहारिणी"त्यादिरूपो न तु पूर्वोक्तरूपः । श्रीयमु-नाया निजाचार्यप्राकट्यात्पूर्वमेवंविधस्वरूपाज्ञानात्तदनिरूपणात् । अतोऽ-यमेवोत्कर्ष एतत्सङ्गत्यनन्तरं भावी मन्तव्य इति भावः । **एतादृश्येति** । स्वसंबन्धेन स्वसमानगुणसंपादिकयेत्यर्थः । **भगवत्पत्नीत्वादिति** । पत्नी-त्वादेव सपत्नीत्वं न तु पुष्टिमार्गीयलीलासंबन्धित्वभक्तानुगुणत्वादिगु-णैरित्यर्थः । **तत्राऽपीति** । पत्नीत्वेऽपीत्यर्थः । **भक्तानुगुणत्वमिति** ।

---

१ तत्रा भवती प्रिये तवेतीति **क.** तत्रापि प्रियेति वेतीति **ख.** तत्रापि भगवती प्रियातीवेतीति **ग.** इष्टस्त्वेवम्. २ पूर्वकसेवाकारणादिति **ग-घ.** पूर्वकसेवाकरणा-दिति **क.** पूर्वकं सेवाकरणादिति **ङ.** पूर्वकं तत्सेवाकरणादिति **ख-च.** प्रतिभातस्तु स्वीकृतः । ३ भवत्सङ्गतिज इति **च.** भगवत्सङ्गतिज इति **ग.**

नमोऽस्तु यमुने सदा तव चरित्रमत्यद्भुतं
न जातु यमयातना भवति ते पयःपानतः।
यमोऽपि भगिनीसुतान्कथमु हन्ति दुष्टानपि
प्रियो भवति सेवनात्तव हरेर्यथा गोपिकाः ॥ ६ ॥

ण्डयति ॥ ५ ॥ एतादृश्यां त्वयि नमनातिरिक्तं न वक्तुं शक्यमित्याशयेनाऽऽहुः—नमोऽस्त्विति । त्वयि नमनमपि दुर्लभमतः प्रार्थ्यते—अस्त्विति । अद्भुतत्वमेवाऽग्रे उपपादितम् ॥ ६ ॥ आवश्यकदैहिकधर्मेऽपि

दोषनिवर्त्तकत्वेनेत्यर्थः । गुणस्तु हरिप्रियपदेनैव सिद्ध इति भावः। **मनसि मे सदा स्थीयतामिति मूले** । मनसो भावाधिष्ठानत्वेन तत्र पूर्वोक्तधर्मवत्याः सततस्थितौ भावस्याऽपि निर्दोषपूर्णगुणत्वं सेत्स्यतीति भावः ॥ ५ ॥ **एतादृश्यामिति** । भक्तोत्कर्षाधायिकायां भक्तानुगुणायां चेत्यर्थः । एतेनैतादृगुपकर्त्र्यां प्रत्युपकृत्यसम्भवेन[1] यथाकथञ्चिन्नमनमेव माहात्म्यज्ञानात्संभवति नाऽन्यदित्युक्तं भवति । **नमनमपीति** । भगवति नमनं संभवत्यपि । भगवन्माहात्म्यस्य शास्त्रसिद्धत्वात् । भवत्यां तु लीलासृष्टिप्रवेशे तादृग्भावसंपत्तौ तत एव तथाविधभावावगतौ तद्भवतीति दुर्लभमेवेत्यर्थः। **अद्भुतत्वमेवेति** । मूले अतिशब्दादद्भुतत्वमपि[2] तथाविधं वाच्यम् । तत्राऽयं[3] भावः । भगवानद्भुतकर्मा । "कृष्णायाऽद्भुतकर्मण" इत्याचार्यैर्निरूपितत्वात् । तच्चाऽसाधनं साधनं करोतीत्यादिरूपम् । यथाऽसाधनं कामादि प्रमेयबलप्राकट्येन साधनं भगवद्भावनाहेतुत्वेन । तत्र विषयत्वेन स्वप्रवेशात् । अत एव "गोप्यः कामादि"त्यादिवाक्यानि । उक्तं चाऽऽचार्यवर्यैः "कामान्ता चै[4] कृतिः स्फुटा । कामोद्भूते तथा प्रीतिरि"ति । एवं सति भगवानसाधनमपि स्वरूपबलेन साधनं करोति । तथाविधस्वरूपप्रदर्शनेन[5] तादृग्भावजननात् । अत्र तु

---

१ अत्युपसर्गादिति ख-ग-घ. २ अद्भुतमपीति क-ग-घ. ३ अत्रायमिति क-ख-ङ. ४ तत्कृतिरिति च. ५ दर्शनेनेति क-ख-ग-घ. प्रदर्शने इति च.

भावनाभावेऽपि असाधनं पयःपानं पिपासाहेतुकं तथा फलसाधकं साध[1]नीकरणाभावेऽपीत्यत्यद्भुतत्वमेतच्चरित्रस्येति भावः । न हि पिपासया पानीयपाने काऽपि तद्भावना सम्भवति । अतस्तदसाधनमेव । ननु यमयातनाभावस्तु भगवन्नाम्नाऽपि भवतीति को विशेष एतच्चरित्र इति चेत्तत्राऽऽहुः—**जातु इति मूले** । कदाचिन्नामापराधेषु सत्सु गुरुवैमुख्यदुःसङ्गवर्जनरूपाङ्गद्वयाभावे न फलत्यपि नाम । न तथा प्रकृते । न हि पिपासया पाने नामग्रहण इव किञ्चिदङ्गमपेक्ष्यम् । अतो महानेव विशेष इति भावः । नन्वत्र कोपपत्तिः पयः[2]पानेन यमयातनाभावे । लौकिकेन[3] तेनाऽदृष्टाजननात् । नाऽपि दृष्टद्वारा । असम्भवात् । न हि पिपासाहेतुकपयःपानस्य यमयातनाभावहेतुत्वं क्वचिदपि लोके सिद्धमित्याशङ्क्याऽऽहुः—**यमोऽपीति मूले** । श्रीयमुना हि यमभगिनी । सूर्यापत्यत्वात् । तत्राऽपि कनिष्ठा । यमोत्पत्त्यनन्तरं तद्दोषपरिहाराय रविणा पश्चादुत्पादितत्वात् । अतो यमसन्माननीया । तस्याः पयःपाने तत्सुतत्वम् । पयःशब्दस्य श्लिष्टार्थ[4]कत्वात् । वस्तुतोऽपि पयःपानेन सुतत्वम्[5] । पयसैव देहोत्पत्तेः । भूतान्तरापेक्षया पयस एव विशेषतो देहोत्पादकत्वात् । "[6]पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती" ति श्रुतेः । तादृशेषु दोषसत्त्वेऽपि भागिनेयत्वेनाऽतिमान्यत्वात्स्वत एव कथं यमस्तांस्तथा करोतीत्यर्थः । एवं दोषनिवारकमद्भुतचरित्रमुक्त्वा फलसंपादकमद्भुतचरित्रमाहुः—**प्रियो भवतीति मूले** । भगवदङ्गीकृतानां भगवदुक्तसाधनैर्भगवति प्रीतिसिद्धिर्भगवच्छास्त्रसिद्धा । न तु भगवतो जीवेषु प्रीतिः । तेषामविद्यादिदोषग्रस्तत्वात् । न हि निर्दोषः सदोषेषु रमते प्रीणाति च ।

---

१ साधनेति **च.** २ पयःपाने न यमयातनाभावहेतुत्वं क्वचिदपि लोके सिद्धमित्याशङ्क्याऽऽहुः—यमोऽपीतीति **ख.** पयःपानेन यमयातनाभावः । लौकिके पयःपाने कृते अदृष्टे अलौकिको यमयातनाभावः । तस्याऽनुत्पत्तिः । नापि दृष्टद्वारा । असम्भवादित्यादिः **च.** ३ लौकिके इति **ङ.** ४ निष्टार्थेत्यादि **च.** ५ तत्सुतत्वमिति **ग-घ.** ६ इतः प्राक्—पञ्च महाभूता तत् पेक्षया जलस्यैव सुख्यत्वमित्येतान्यक्षराण्यधिकानि **च.**

ममाऽस्तु तव सन्निधौ तनुनवत्वमेतावता
न दुर्लभतमा रतिर्मुररिपौ मुकुन्दप्रिये।

त्वत्सम्बन्धे मुक्त्यधिकभक्तिप्राप्तिर्यत्र तत्र का शङ्का यमयातनाभाव इत्याहुः—ममाऽस्त्विति। तव सन्निधौ तनोर्नवत्वं लीलोपयोगिनूतनदेह-सम्पत्तिरस्तु। एतेन पूर्वदेहनिवृत्तिः सूचिता। इदमपि त्वत्कृतमेव भवति

तव पुष्टिमार्गीयायाः सेवनात्सर्वभावेन चेतसस्त्वदधीनत्वकरणात्त्वदीयत्वे संपन्ने स्वसंबन्धिसंबन्धाद्धरेः सर्वदुःखहर्तुस्तादृक्स्वभावस्य स सेवकस्त्व-दीयः प्रियो भवतीत्यर्थः इदमपि तवाऽद्भुतचरित्रम्। शास्त्रासिद्धत्वात्। लोकेऽपीतरतोषहेतुकृतेरितरतोषासाधकत्वाच्च। ननु किं प्रमाणमत्र कुत्राऽप्येवं फलस्याऽदृष्टत्वादित्याशङ्क्य दृष्टान्तमाहुः—**यथा गोपिका इति मूले**। यथा व्रतप्रसङ्गे फलप्रकरणीयगुणगानप्रसङ्गे च तव सेवनात् गोपिका हरेस्तथा जाताः। तथाऽन्योऽपि भगवत्सेवकस्तथा भवतीति भावः। अथवा। यथा गोपिका इति दृष्टान्तेन न प्रीतिमात्रं किन्तु यथा ताः सर्वभावेन प्रीतिविषया भगवतस्तथाऽयमपि भवतीति भावः॥ ६॥ **आवश्यकेति**। देहस्य देहान्तरारम्भकत्वमावश्यको दैहिको धर्मः। "प्रज्ञया शरीरं समारुह्ये"त्यादिश्रुतेः। किं बहुना। मुक्तावपि भगव-च्छास्त्रे सेवोपयोगि वैकुण्ठादिषु देहान्तरम्। अत एवोक्तमाचार्यैः सेवा-फलग्रन्थे—"सेवोपयोगिदेहो वैकुण्ठादिष्वि"ति। तस्मिन्नपि त्वत्संबन्धे सान्निध्यसंपादिते दैशिकेऽपि संबन्धे यत्र तथाविधभक्तिसिद्धिस्तत्र तत्र जातानां यमयातनाभात्रे का शङ्केति कैमुतिकन्यायो निरूप्यत इत्यर्थः। **तव सन्निधाविति**। एतेन दुष्टसन्निधानकृतत्वत्तिरोभावाभावस्थल एव तथात्वमित्याशयो ज्ञेय इति बोधितम्। **पूर्वदेहनिवृत्तिरिति**। घटस्य पाकेन मृत्त्वनिवृत्तिवन्निवृत्तिरत्र वाच्या। अन्यथा पूर्वं तनोर्नवत्वमिति न

---

१ स्वसेवकस्तदीय इति **च.** २ प्रतीतमात्रमिति **च.** ३ शरीरमारूह्येति **ख.** ४ दैहिकेऽपीति **ग.** युक्तन्तु यथानिवेशमिति न प्रसार्य्यम्। ५ पूर्वतनो-रिति **क-ख.**

अतोऽस्तु तव लालना सुरधुनी परं सङ्गमात्
तवैव भुवि कीर्त्तिता न तु कदापि पुष्टिस्थितैः ॥ ७ ॥

न त्वन्यथेति ज्ञापनाय प्रार्थनम्—अस्त्विति । एतावता शरीरपरिवर्त्तमात्रेणैव मुररिपौ रतिर्दुर्लभतमा न भवतीत्यर्थः । किन्तु तनुनवत्वेन सुलभैव । कदाचित्प्रतिबन्धके विद्यमानेऽपि यथा जलदोषरूपमुरस्य निवारकस्तथा त्वत्सम्बन्धात्सर्वदोषनिवारकत्वं मुररिपुपदेनोक्तम् । अतः कारणाद्यावदाधुनिकशरीरनिवृत्तिस्तावत्तव लालना स्तुतिरूपा अस्तु । साऽपि

व्याख्यातं स्यादिति भावः । **दुर्लभतमा नेति** । त्वत्संबन्धस्यैव दुर्लभत्वेन सा भगवति दुर्लभा[1] तु भवत्येवेति तमप्प्रत्ययाशयो बोध्यः । **प्रतिबन्धक इति** । भक्त्युत्पत्तावित्यर्थः । **त्वत्संबन्धादिति** । यथा नरकासुरनिरुद्धकन्यानुग्रहाय तत्संबन्धाज्जलदोषरूपमुरस्य निवारकस्त[2]था त्वत्संबन्धात्त्वदीयसर्वसेवकदोषनिवारक इति भावः । एतेन त्वत्संबन्धिनां भगवद्रतिप्रतिबन्धनिरसनायाऽपि यत्नो न विधेय इत्युक्तम्[3] । **मुकुन्दप्रिय इति मूले** । पदतात्पर्यं तु—भगवान् मुकुन्दो मोक्षदाता गृह एव चतुर्विध[4]पुरुषार्थं भावेन स्वयमाविर्भूयाऽनुभावयन् तादृशसमाजसख्यसंपादनेन स्वतन्त्रभक्त्या भगवदीयत्वसंपादकस्तादृशस्य प्रियात्वेन तद्धर्मवत्त्वात् भगवदीयत्वसंपादकत्वमस्या इति स्वतन्त्रभक्तिदा[5]यिकात्वेन परमोत्कर्षो निरूपितो भवतीति तथा संबोधनमिति । **अतः कारणादिति** । यतो यथाकथञ्चित्त्वत्संबन्धे प्रतिबन्धनिवृत्तिपूर्वकभक्तिप्राप्तिसौलभ्यमतः कारणादित्यर्थः । **यावदाधुनिकेति** । नवीने अलौकिके तु शरीरान्तरे संपन्ने लीलारसानुभव एव त्वत्तीरे[6] भवेदिति भावः । **लालना स्तुतिरूपेति** । यथा

१ दुर्लभा न भवत्येवेति **ग.** २ तथेत्यारभ्य निवारक इत्यन्तो ग्रन्थो न दृश्यते **ग.** ३ इति ज्ञेयमिति **च.** ४ चतुर्विधपुरुषार्थभावेनेति **ख.** ५ स्वतन्त्रभक्तदायकत्वेनेति **ख-च.** ६ तत्तीरे इति **क-ग-घ-ङ-च.**

स्तुतिं तव करोति कः कमलजासपत्नि प्रिये

त्वत्कृपयैव नाऽन्यथेति प्रार्थ्यते—अस्त्विति। गङ्गाया अपि फलसाधकत्वं त्वत्सम्बन्धादेवेत्यत आहुः। सुरधुनी तव सङ्गमात् परं अत्यर्थं भुवि कीर्त्तिता स्तुतेत्यर्थः। न तु कदापि त्वद्रहिताऽपीत्यर्थः। ननु क्वचित्पुराणादौ केवलाया अपि स्तुतिर्दृश्यत इति स्तुतौ विशेषमाहुः—पुष्टिस्थितैरिति। मर्यादामार्गीयैः केवलाऽपि स्तूयते। त्वत्स्वरूपाज्ञानात्। पुष्टिमार्गीयास्तु त्वत्स्वरूपं जानन्तीति त्वत्सम्बन्धादेव स्तुवन्तीत्याहुः—पुष्टिस्थितैरिति॥ ७॥ यत्र त्वत्सम्बन्धात्सर्ववन्द्यगङ्गास्तुतिस्तत्र त्वत्स्तुतौ को वा समर्थ इत्याहुः—स्तुतिं तवेति। अशक्यस्तुतित्वे हेतुमाहुः—कमल-

---

जननी लालनसमये प्रेम्णा बालकं स्तौति। सा स्तुतिरपि लालनैव न तु गुणकीर्त्तनम्। लालनमध्यपातित्वात्। तथैषाऽपि स्तुतिर्लालनैवेति स्तुतिरूपेत्युक्तमित्यर्थः। **फलसाधकत्वमिति**। पुष्टिमार्गीयफलसाधकत्वमित्यर्थः। पुष्टिमार्गीयं फलं तु साक्षात्पुरुषोत्तमलीलासम्बन्धोऽलौकिकदेहसिद्ध्या। तत्संपादकत्वं तु गङ्गायास्त्वत्संबन्धादेव। अन्यथा "स्रोतसामस्मि जाह्नवी"ति वाक्येन [1]तस्या विभूतिरूपत्वेन निरूपणादेतत्फलसाधकत्वमुच्यमानं बाधितं स्यात्। अत एव पुष्टिस्थितैरित्युक्तम्। अन्येषामेतन्माहात्म्यानवगतेः। पद्यपदलापनिका तु पुष्टिस्थितैः निःसाधनानुग्रहमार्गनिष्ठैः सुरधुनी लोकान्तरनदी भुवि तु पुनर्न कदाऽपि कीर्त्तिता तादृ[2]क्फलसाधकत्वेन। किन्तु सर्वदैव परं(?) तवैव सङ्गमात्सा तथा कीर्त्तिता। अतः सर्वदा तव लालना [3]पूर्वोक्तरूपाऽस्त्विति संबन्धो ज्ञेयः॥ ७॥ **अशक्यस्तुतित्व इति**। वागगोचरमाहात्म्यसत्त्वाद्यथा [4]रसस्वरूपानन्देऽशक्यस्तुतित्वम्। "यतो वाच" इति श्रुतेः। तथाऽत्राऽपीति भावः। कमलजासपत्नीति हेतुनिरूपणम्। सपत्नीत्वेन लक्ष्मीविरुद्धस्वभावत्वादित्यर्थः। अयमभिप्रायः। लक्ष्मीर्हि प्रमाणसिद्ध[5]ब्रह्मानन्दस्वरूपा। अतः [6]प्रमाणभूतैर्वेदादिवाक्यैर्लक्ष्मीमाहात्म्यनिरूपणमुपपद्येताऽपि।

---

१ तस्याविभूतरूपत्वेनेति **च.** २ तादृक्पुष्टिमार्गीयफलसाधकत्वेनेति **च.** ३ सा पूर्वोक्तरूपेति **ग-घ.** ४ रसरूपेति **ख.** ५ ब्रह्मानन्दरूपेति **च.** ६ प्रमाणसिद्धैरिति **च.**

हरेर्यदनुसेवया भवति सौख्यमामोक्षतः ।

जासपत्नीति । सर्वत्र स्तुत्यत्वं भगवत्सम्बन्धात् । स सर्वत्र लक्ष्म्यपेक्षया न्यून एव । त्वं तु तस्या अपि सपत्नी तत्समानसौभाग्यवती । ननु लक्ष्मीस्तुतिस्तु लोके दृश्यते । तर्हि तत्साम्यं चेत्कथं स्तुतिरशक्येत्याहुः—प्रिये इति । साम्यमात्रे कर्त्तुं शक्यत एव । अत्र तु ततोऽप्यधिकं प्रियत्वमस्तीति स्तुतिकरणमशक्यम् । ननु कथं ज्ञायते लक्ष्म्यपेक्षयाऽऽधिक्यमस्तीति । तत्र हेतुमाहुः—हरेर्यदनुसेवयेति । हरेरनु पश्चाद्यस्याः सेवया

त्वं तु पुष्टिलीलास्थत्वेन तदतीतप्रमेयानन्दरूपेति "यतो वाच" इति श्रुतेरशक्यस्तवेति विरुद्धस्वभावत्वात्सपत्नीति । लक्ष्म्याः स्तुत्यत्वमुपपादयन्ति—**सर्वत्रेति** । लोके वेदे च स्तुत्यत्वं भगवत्संबन्धात् । तदभावे निन्द्यत्वमेव । "मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमि"ति वचनात् । संबन्धतारतम्येन [1]स्तुत्यत्वतारतम्यम् । तथाच संबन्धस्तु लक्ष्म्या निरतिशय एव । उरसि सर्वदा निवासात् । अतः स्तुत्यत्वं तत्रोपपन्नमिति भावः । **तत्समानसौभाग्यवतीति** । अन्यासां भगवत्पत्नीनां लक्ष्म्यंशत्वेन तदधीनत्वम् । तव तु तत्समानसौभाग्यवत्त्वेन लक्ष्मीवत्स्वातन्त्र्यमिति भावः । **ननु लक्ष्मीस्तुतिस्त्विति** । स्वातन्त्र्ये[2]ऽपि साम्यसत्त्वे लक्ष्मीस्तुतिरिव कथमेतत्स्तुतिरशक्येत्याक्षेपार्थ इत्यर्थः । प्रिय इति संबोधनम् । स्वातन्त्र्येण साम्येऽपि प्रियात्वेन ततोऽप्याधिक्यसत्त्वान्न लक्ष्मीदृष्टान्तेन शक्यस्तुतित्वमस्या उपपद्येतेति भावः । अत एव "श्रियं चाऽऽत्यन्तिकीं ब्रह्मन् येषां गतिरहं परे"ति दुर्वाससं प्रति प्रभुरेवैतादृशानां ततोऽपि प्रियत्वमाहेत्याधिक्यं प्रमाणै[3]सिद्धमेव । फलतोऽप्याधिक्यं वक्तुमाहुः—**हरेर्यदनुसेवयेति** । हरेः संबन्धिनी या यदनुसेवा हरिसाहित्येन तत्रापि अनु पश्चाद्भगवत्सेवां विधाय गौणभावेन यस्याः सेवा तया मोक्षं पुरुषोत्तमसायुज्यं मर्यादीकृत्य सालोक्यादिसुखं भवति । पुरुषोत्तमसायुज्यस्य

---

१ स्तुतित्वतारतम्यमिति ग-घ. २ तत्स्वातन्त्र्येऽपीति ख. ३ प्रमाणप्रसिद्धमेवेति क-ग-घ-ङ-च.

इयं तव कथाऽधिका सकलगोपिकासङ्गम-
स्मरश्रमजलाणुभिः सकलगात्रजैः सङ्गमः ॥ ८ ॥

मोक्षं मर्यादीकृत्य सुखं भवति। मोक्षप्राप्तिर्भवतीत्यर्थः। न तु ततोऽप्यधिकं भजनानन्दाख्यं सुखं भवति। तदपि भगवत्सहिततद्भजनेन न तु केवलायाः। केवलाया मोक्षविघातकत्वात्। अनुशब्दान्मुख्यतया भगवद्भजनम्। तदनुगुणत्वेन लक्ष्म्याः। कालिन्द्युत्कर्षमाहुः—इयं तव कथेति। इयमग्रत उच्यमाना तव कथाऽपि सर्वमुक्त्यपेक्षयाऽधिका। अत एवैतत्कथारसिकानां न मोक्षेच्छागन्धोऽपि। तदेवोक्तं पञ्चमस्कन्धे—"अथ ह वाव तव महिमामृतसमुद्रविप्रुषा सकृल्लीढया विस्मारितदृष्टश्रुत-

---

भक्तिमार्गेण केवल[2]भगवत्सेवासाध्यत्वात्। अत एवोक्तमाचार्यवर्यैः—"आदिमूर्तिः कृष्ण एव सेव्यः सायुज्यकाम्यये"ति निबन्धे। तत्रापि कृष्णपदेन भक्तिप्राप्यः प्रभुरेवकारेण इतरनिरासश्चोक्तः। **मोक्षप्राप्तिर्भवतीति**। सालोक्यादिमोक्षप्राप्तिर्भवतीत्यर्थः। अत एव वैकुण्ठे लक्ष्मीसखीनां सालोक्यादिसुखं न लक्ष्मीवत्पुरुषोत्तमनित्यसंयोगरूपसायुज्यम्। तस्य लक्ष्मीमात्रभोग्यत्वात्। न हि स्वभोग्यमन्येभ्यः कोऽपि दातुमीष्टे। अत एवोक्तं बालबोधे—"लोकेऽपि यत्प्रभुर्भुङ्क्ते तन्न यच्छति कर्हिचिदि"ति। **न तु ततोऽपीति**। सायुज्यादप्यधिकमित्यर्थः। हरेरित्यस्य षष्ठ्यन्तपदस्य संबन्धिबोधकस्य तात्पर्यमाहुः—**तदपीति**। मोक्षसुखमपीत्यर्थः। **केवलाया मोक्षविघातकत्वादिति**। केवला भगवतः पुरुषोत्तमाद्भेदेन स्थिता विभूतिरूपा भजनेन धनादिसंपत्प्रदा तस्या विषयासक्तिहेतुत्वेन वैराग्य[3]विघटनद्वारा मोक्षविघातकत्वमित्यर्थः। **कालिन्द्युत्कर्षमिति**। भजनानन्दरूपफलसाधकत्वेन लक्ष्मीत उत्कर्षमित्यर्थः। **सर्वमुक्त्यपेक्षयेति**। लक्ष्मीतत्सेवकफलरूपसायुज्यसालोक्यादिमुक्त्यपेक्षयेत्यर्थः। **अत एवेति**। यतो मुक्त्यपेक्षयैतत्कथाया आधिक्यमित्यर्थः। **एतत्कथारसिकानामिति**। मोक्षे हि न भेदेन स्थितिरिति सर्वात्मभावलभ्यरसकथा-

---

१ सर्वत्र मुक्त्यपेक्षयेति ख. २ केवलमिति ख. ३ वैराग्यविघातद्वारेति क-ख-ग-घ. वैराग्यविघ्नद्वारेति च.

तवाऽष्टकमिदं मुदा पठति सूरसूते सदा
समस्तदुरितक्षयो भवति वै मुकुन्दे रतिः ।

सुखलेशाभासाः परमभागवता एकान्तिन" इति । सा केत्याकाङ्क्षाया-माहुः—सकलगोपिकेति । सकलगोपिकासङ्गमेन स्मरसम्बन्धी यः श्रमस्तेन जनिता ये स्वेदजलाणवः सकलगात्रजास्तैः सङ्गमो यस्याः । एते जलाणवो न श्रमस्वेदरूपाः किन्तु विविधसङ्गमरसस्य सर्वावयवपूर्णस्याऽत्युच्छलनेन बहिरागतस्यैव बिन्दवो न तु केवलजलमात्रस्य । अत एवोक्तम्—सकलगात्रजैरिति । एभिर्विशेषणैः परमकाष्ठापन्नपुष्टिपुष्टि-मार्गान्तरङ्गभक्तत्वं सर्वदैतद्रसपूर्णत्वमन्तरङ्गभक्तानुगुणत्वमेतल्लीलामध्यपातित्वादिकं सूचितम् । स्वस्यैतद्रसपूर्णत्वेन केवलैतद्भजनकर्त्तुरप्येतद्रसं ददातीति स्पष्टमेव वैलक्षण्यम् ॥ ८ ॥ एवं कालिन्दीं स्तुत्वैतत्स्तोत्र-पाठफलमाहुः—तवाऽष्टकमिति । यद्यप्यन्यकृतान्यपि स्तोत्राणि सन्ति तथापि वक्ष्यमाणं फलमेतत्स्तोत्रपाठेनैव भवति नाऽन्यथेति ज्ञापनायेद-मित्युक्तम् । अन्यकृतस्तोत्रेष्वेवंविधस्वरूपनिरूपणाभावात् । इदं तवाष्टकं यः पठति तस्य पूर्वं समस्तदुरितक्षयो भवति । तदनन्तरं मोक्षदा-

---

रसिकानां तत्र तदभावान्न तदिच्छागन्धोऽपीत्यर्थः । "अथ ह वावे"त्यादिना प्रमाणोपन्यासः । **सा केति** । कथेत्यर्थः । यस्या इति पञ्चमी षष्ठी च व्याख्येया । पञ्चमीपक्षे—यस्याः सकाशादन्येषामेतत्संबन्धिनामपि तत्सङ्गमः । षष्ठीपक्षे—श्रीयमुनायास्तत्सङ्गमः । तदाऽपि कृपया तद्रसदातृत्व-मित्यर्थः । **एभिर्विशेषणैरिति** । एतत्कथायां सकलगोपिकास्तत्सङ्गमः सोऽपि रसावेशजनितो येन श्रमः तेनोद्भूतं स्वेदजलं तदीया अणवोऽति-सूक्ष्मबिन्दवस्तैः सङ्गमः एतावन्ति कथाविशेषणानि तैरित्यर्थः । एतादृशी एतत्कथेत्यस्यामपि परमकाष्ठेत्याद्युक्तसकलधर्मवत्त्वं सूचितमित्यभिहित(?)-मिति भावः । **केवलैतद्भजनकर्त्तुरपीति** । अनन्यभजनकर्त्तुरित्यर्थः ॥ ८ ॥ **वक्ष्यमाणमिति** । अनुपदमेवाऽत्र पद्ये वक्ष्यमाणमित्यर्थः । समस्तेति ब्रह्मसंबन्धवदेकहेलया[2] अखिलपापक्षय एतत्स्तोत्रपाठे[3] बोधितः । **तदन-**

---

१ पराकाष्ठापन्नेति क-ख. २ अनेकहेलयेति ग. घ. ३ एतत्स्तोत्रपाठेनेति ख.

तया सकलसिद्धयो मुररिपुश्च सन्तुष्यति
स्वभावविजयो भवेद्वदति वल्लभः श्रीहरेः ॥ ९ ॥

इति श्रीवल्लभाचार्य्यविरचितं श्रीयमुनाष्टकस्तोत्रं सम्पूर्णम् ।

तर्यपि स्नेहो भवति । अत एवोक्तम्—"नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत" इति । मुकुन्दपदाद्यद्यपि मोक्षमेव साधारण्येन सर्वेभ्यो ददाति तथापि त्वत्स्तुतिपाठात्प्रसन्नो भक्तिमेव ददाति न तु मोक्षमपीति भगवत्स्वभावपरावर्त्तकत्वमुक्तम् । ततः किमिति तत्राऽऽहुः । तया सकलसिद्धयः पूर्वोक्ताः सर्वात्मभावादयो भवन्तीति शेषः । ननु प्रतिबन्धके विद्यमाने सति कथमेतत्स्तोत्रमात्रादेतावद्भवतीति चेत्तत्राऽऽहुः—मुररिपुश्च सन्तुष्यतीति । यथा दोषरूपं तन्निरुद्धकन्यासुखप्राप्तिप्रति-

---

न्तरमिति । भक्तिप्रतिबन्धकसमस्तदुरितक्षयानन्तरमित्यर्थः । अन्यथा दुरितानामनन्तत्वेनैकदा तदनिवृत्तौ रत्युत्पत्तेरनवसरपराहतिः स्यात् । अत एवेत्यादिना प्रमाणोपन्यासपुरस्सरं समस्तपापाभावस्य भगवद्भक्त्युत्पत्तौ हेतुता निरूपिता । यद्यपि "ज्ञानाग्निः सर्वकर्माणी"ति वाक्याज्ज्ञानेनाऽपि सर्वकर्मनिवृत्तिः । परन्तु तत्र ज्ञानसाधने क्लेशभूयस्त्वमत्र तु पाठमात्रेणैतत्स्तोत्रस्य सा[1] भवतीत्यनायासेन तत्साधकत्वं पाठस्येति तदुत्कर्षो ज्ञेयः । **प्रसन्न इति** । यथा लीलासृष्टिस्थेभ्यस्त्वत्साक्षात्कारात् त्वत्संबन्धेन प्रसन्नस्तथा आधुनिकेभ्यः परोक्षे त्वत्स्तुतिपाठादेव प्रसन्नो भवतीत्यर्थः । भक्तिमेवेति निश्चयवाचकवाइत्यव्ययपदप्रयोगतात्पर्यं ज्ञेयम् । **भगवत्स्वभावपरावर्त्तकत्वमिति** । एतत्स्तोत्रपाठस्येत्यर्थः । अत्राऽयं भावः । भगवत्स्वभावः स्वामिनीभ्यो देयं फलमन्येभ्यो न प्रयच्छति । अन्यथाऽनुकम्पापात्रमुद्धवं व्रजे न प्रेषयेत् । स्वयमेव तादृग्भावं दद्यात् । एतत्स्तोत्रपाठे तु तत्कर्त्तरि श्रीयमुनासंबन्धावगमेन स्वामिनीभ्य इव स्वयमेव तादृग्भावं प्रयच्छतीति तथेति भावः । **ततः किमिति** । ततो भगवद्भावादग्रे किं भवतीत्यर्थः । **सन्तुष्यतीति** । भगवत्प्रियात्वाद्यमुनायास्तत्स्तुतौ भगवत्तो-

---

१ सा रतिरिति ख.

बन्धकं निराकृत्य ता अङ्गीकृतवानेवमेतत्पाठेनाऽपि प्रतिबन्धं निवार्य तमप्यङ्गीकरोतीत्यपि ज्ञापनाय मुररिपुपदम् । फलान्तरमाहुः—स्वभावविजयो भवेदिति । स्वभावस्य विजयः परावृत्तिर्भवति । सवासनेति व्युपसर्गार्थः । दुष्टस्वभावोऽप्युत्तमस्वभावो भवतीत्यर्थः । नन्विदमनेकतपःसाध्यं कथमेतत्पाठमात्रादिति चेत्तत्राऽऽहुः—वदति वल्लभ इति । तेनाऽऽप्तवाक्यत्वेन प्रामाण्यमुक्तम् । नन्वितः पूर्वं केनाऽप्यनुक्तत्वाद्भवदुक्तिमात्रेण कथं प्रामाण्यमिति चेत्तत्राऽऽहुः—श्रीहरेरिति । साक्षाच्छ्री-

---

षस्तत्रापि सम्यक्तोषो यथा गोपिकासु । अत एव "प्रियो भवति सेवनात्तव हरेरि"ति पूर्वमुक्तम् । चकारेण स्वामिन्योऽपि तुष्यन्तीत्यर्थः । लोकेऽपि स्वस्तवनापेक्षया स्वप्रियस्तवनस्याऽतितोषहेतुत्वादिति भावः । **फलान्तरमिति** । प्रथममेकं फलं समस्तदुरितक्षयपूर्वकसकलसिद्धिसहितभगवद्भावप्राप्तिरूपं निरूपितमित्यर्थः । **स्वभावविजय इति** । "काममयोऽयं पुरुष" इति श्रुतेः स्वभावस्य कामभावरूपजीवस्वभावस्य परावृत्तिः सर्वात्मभावसिद्ध्या भवतीत्यर्थः । यद्वा । स्वभावस्य सात्त्विकादिस्वभावस्य विजयः स्वाधीनीकरणं लीलामात्रोपयोगितया प्रवर्त्तनरूपं स्वरूपतो गुणातीतत्वसिद्ध्या भवतीत्यर्थः। अथवा। स्वभावस्य भगवद्धर्मप्रवेशजन्यमानादिस्वभावस्य दैन्यभावसिद्ध्या परावृत्तिर्भवतीत्यर्थः । **दुष्टस्वभाव इति** । शुद्धपुष्टिमार्गविचारेण पूर्वोक्तरूपस्वभावस्य दुष्टत्वमित्यर्थः । **आप्तत्वे(?)नेति** । यथादृष्टार्थवादित्वेनाऽऽप्तत्वम् । तच्चाऽऽचार्यचरणेष्वेव सम्भवति । लीलासृष्टिसंबन्धित्वेन लीलास्थभक्तजनफलजननदर्शनात् । अत एतदाप्तत्वमेतेष्वेवेत्येतद्विषये स्वोक्तमेव प्रमाणमिति बोधनाय स्वनामोक्तिरिति भावः । नन्वित्यादिना आप्तत्वसंशयमादाय पूर्वपक्षो ज्ञेयः । साक्षादित्यादिनिरूपणस्याऽयमभिप्रायः । हरिपदेन निःसाधनगजराजोद्धृतये तद्दैन्येन प्रादुर्भूतः पुरुषोत्तम उच्यते । स च पुष्टिमार्गीयप्रभुरेव । सर्वसाधनराहित्ये के-

---

१ पूर्वकमिति **क. ग. घ. ङ.** २ भगवत्प्राप्तीति **ख.**

पुरुषोत्तमसम्बन्धी यतोऽहमतो वदामीत्यर्थः । अत्राऽयमाशयः । साक्षात्स्वरूपसम्बन्धिनां स्वरूपं साक्षात्तत्सम्बन्धिन एव जानन्ति न त्वन्ये । श्रीकालिन्द्याः साक्षात्तत्सम्बन्धित्वं पूर्वं प्रकटमेवोपपादितम् । स्वातिरिक्तानां साक्षाच्छ्रीगोकुलेशसम्बन्धाभावात्साक्षात्तत्सम्बन्धिन्याः स्वरूपाज्ञानात्तदकथनम् । स्वस्य तु साक्षात्तादृशत्वात्तत्स्वरूप[1]ज्ञानात्तत्कथनमिति नाऽनुपपत्तिः काचित् ।

इति श्रीविट्ठलेश्वरविरचिता श्रीयमुनाष्टकविवृतिः सम्पूर्णा ।

वलदैन्येन प्रादुर्भूतत्वात् । अत एवाऽग्रे साक्षादित्युक्तम् । पुष्टिमार्गीयातिरिक्तेषु साक्षात्संबन्धाभावेन साक्षात्स्वरूपप्रादुर्भावाभावात् । तत्र तु[2] पुरुषोत्तमस्य विशुद्धसत्त्वव्यूहादिव्यवधानमेव । अत एव श्रीपदम् । सौन्दर्यादिरसानुभावकधर्मप्राकट्यस्य पुष्टिमार्ग एव संभवात् । तादृशस्य वल्लभत्वेन संबन्धीति मदुक्तौ नाऽऽप्तत्वसंशयः पुष्टिपथानुगृहीतैरस्मदीयैर्विधेय इति दिक् ।

इति श्रीमन्निजाचार्यकृपया परया युतः ।
हरिदासश्चकारेदं टिप्पणं विवृतौ प्रभोः ॥ १ ॥
प्रसीदन्तु निजाचार्याः स्वदासे निजवंशगे ।
प्रयच्छन्तु स्वतो भावं यमुनासहिते हरौ ॥ २ ॥

इति श्रीमद्वल्लभाचार्य्यचरणतामरसपरागाभिलाषिहरिदासप्रणीतं श्रीयमुनाष्टकविवृतिटिप्पणं सम्पूर्णम् ।

---

१ स्वरूपाज्ञानादिति ख. २ तुर्नास्ति ग.

साम्प्रदायिकाः संस्कृतप्रबन्धाः ।

प्रकाशिताः ।

श्रीमत्सुबोधिनी (प्रथमस्कन्धः)	... ...	२)
भक्तिहंसः (व्याख्यात्रितयसमुद्भासितः)	... ...	।॥=)
बालबोधः (श्रीदेवकीनन्दनकृतप्रकाशोपेतः)		
सेवाकौमुदी.	... ...	=)
सिद्धान्तसिद्धापगा.	... ...	।=)
व्याख्यानरत्नावलिः	... ...	-)

त्तमस्य विरा

रसान

नातिचिरात्प्रकाशयिष्यमाणाः ।

श्रीयमुनाष्टकम्. (श्रीमत्पुरुषोत्तमव्याख्यानुयातम्.)
बालबोधः (श्रीमत्पुरुषोत्तमव्याख्यानुगतः)
निर्णयार्णवः । (श्रीमल्लालूभट्टमहानुभावप्रणीतः)

प्रापणव्ययः पृथक् ।

अधिष्ठानम्—
शुद्धाद्वैतसिद्धान्तकार्यालयः,
बडा मन्दिर, बंबई.

प्रश्रितो—
भट्टश्रीबलभद्रशर्म्मा,
क; का; क; शु; क.